न्यच। “काश्यस्य काशिराजः तस्य दीर्घ-
तमाः पुत्त्रोऽभूत्। धन्वन्तरिस्तु दीर्घतमसोऽ-
भूत्। न हि संसिद्धकार्य्यकारणः सकल-
सम्भूतिष्वशेषज्ञानवित्। भगवता नारायणेन
चातीतसम्भूतौ तस्मै वरो दत्तः। काशिराज-
गोत्रेऽवतीर्य्य त्वमष्टधा सम्यगायुर्व्वेदं करिष्यसि।
यज्ञभाक् त्वं भविष्यसीति। तस्य च धन्वन्तरेः
पुत्त्रः केतुमान् केतुमतो भीमरथः। तस्यापि
दिवोदासः।” इति विष्णुपुराणम्।४।८।२-५॥*॥
अस्यार्थः। “संसिद्धकार्य्यकारणः जरादिरहित-
देहेन्द्रियः। संयतदेहेन्द्रिय इति वा। सकल-
सम्भूतिषु सर्व्वेष्वपि जन्मसु। अशेषज्ञानवित् सर्व्व-
शास्त्रवित्। अतीतसम्भूतौ क्षीराब्धौ जन्मनि।
अष्टधा अष्टाङ्गमायुर्व्वेदम् तदुक्तं लघुवाग्भटे।
कायबालग्रहोर्द्ध्वाङ्गशल्यदंष्ट्राजराविषम्।
अष्टावङ्गानि तस्याहुश्चिकित्सा येषु संस्थितेति।”
इति तट्टीकायां स्वामी॥*॥ दिवोदासः।
इति त्रिकाण्डशेषः॥ (धन्वन्तरिप्रादुर्भावो यथा,
“एकदा देवराजस्य दृष्टिर्निपतिता भुवि।
तत्र तेन नरा दृष्टा व्याधिभिर्भृशपीड़िताः॥
तान् दृष्ट्वा हृदयन्तस्य दयया परिपीड़ितम्।
दयार्द्रहृदयः शक्रो धन्वन्तरिमुवाच ह॥
धन्वन्तरे! सुरश्रेष्ठ! भगवन्! किञ्चिदुच्यते।
योग्यो भवसि भूतानामुपकारपरो भव॥
उपकाराय लोकानां केन किन्न कृतं पुरा।
त्रैलोक्याधिपतिर्विष्णुरभून्मत्स्यादिरूपवान्॥
तस्मात्त्वं पृथिवीं याहि काशीमध्ये नृपो भव।
प्रतीकाराय रोगाणामायुर्व्वेदं प्रकाशय॥
इत्युक्त्वा सुरशार्द्दूलः सर्व्वभूतहितेप्सया।
समस्तमायुषो वेदं धन्वन्तरिमुपादिशत्॥
अधीत्य चायुषो वेदमिन्द्राद्धन्वन्तरिः पुरा।
आगत्य पृथिवीं काश्यां जातो बाहुजवेश्मनि।
नाम्ना तु सोऽभवत् ख्यातो दिवोदास इति क्षितौ।
बाल एव विरक्तोऽभूच्चचार सुमहत्तपः॥
यत्नेन महता ब्रह्मा तं काश्यामकरोन्नृपम्।
ततो धन्वन्तरिर्लोकैः काशीराजोऽभिधीयते॥
हिताय देहिनां स्वीया संहिता विहितात्मना।
अयं विद्यार्थिनो लोकान् संहितान्तामपाठयत्॥”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
विक्रमादित्यराजस्य नवरत्नान्तर्गतरत्नविशेषः।
यथा,—

“धन्वन्तरिक्षपणकामरसिंहशङ्कु-
वेतालभट्टघटकर्परकालिदासाः।
ख्यातो वराहमिहिरो नृपतेः सभायां
रत्नानि वै वररुचिर्नव विक्रमस्य॥”
इति नवरत्नम्॥

(धनोर्धनुर्वेदस्य अन्तमृच्छतीति। महादेवः।
यथा, महाभारते। १३। १७। १०३।
“धन्वन्तरिर्धूमकेतुः स्कन्दो वैश्रवणस्तथा॥”)

धन्वन्तरियस्ता, स्त्री, (धन्वन्तरिणा ग्रस्ता।)
कटुकी। इति शब्दचन्द्रिका॥

धन्वयवासः, पुं, (धन्वदेशोद्भवो यवासः।) दुरा-
लभा। इत्यमरटीकायां भरतः॥ (दुरालभा-
शब्देऽस्य विवरणं ज्ञातव्यम्॥)

धन्वयवासकः, पुं, (धन्वयवास+स्वार्थे कन्।)
दुरालभा। इति राजनिर्घण्टः॥

धन्वयासः, पुं, (धन्वदेशोद्भवो यासः यवासः।)
दुरालभा। इत्यमरः। २। ४। ६१॥

धन्वा, [न्] पुं, (धन्वति जलाभावं गच्छतीति।
धन्व+“कनिन् युवृषीति।” उणां १। १५६।
इति कनिन्।) मरुदेशः। इत्यमरः। २।१।५॥
(यथा, ऋग्वेदे। ६। ३४। ४।
“अनं न धन्वन्नभि सं यदापः सत्रा वावृधुर्हव-
नानि यज्ञैः॥”
अन्तरिक्षम्। तत्रत्यात् उदकमपि। यथा,
ऋग्वेदे। १। १६८। ५।
“धन्वच्युत इषां न यामनि पुरुप्रैषा अहन्यो-
नैतशः॥”
“धन्वच्युतो न धन्वन्शब्दोऽन्तरिक्षस्य वचनः
तेन तत्स्थमुदकं लक्ष्यते उदकच्याविनो मेघा
इव।” इति तद्भाष्ये सायनः॥)

धन्वी, [न्] त्रि, (धनुश्चापोऽस्यस्येति। व्रीह्या-
दित्वात् इनिः।) धनुर्धरः। इत्यमरः। २।
८। ६९॥ (यथा, कुमारे। ३। १०।
“कुर्य्यां हरस्यापि पिनाकपाणे-
र्धैर्य्यच्युतिं के मम धन्विनोऽन्ये॥”)
विदग्धः। इति विश्वः॥

धन्वी, [न्] पुं, (धन्वमस्त्यस्येति। धन्व+इनिः।)
दुरालभा। अर्ज्जुनवृक्षः। (अस्य पर्य्यायो
यथा,—
“धन्वी धनञ्जयः पार्थो नदीजः ककुभोऽर्ज्जुनः।”
इति वैद्यकरत्नमालायाम्॥)
बकुलः। इति राजनिर्घण्टः॥ पार्थः। इति
जिनः॥ (विष्णुः। यथा, महाभारते। १३।
१४९। २२।
“ईश्वरो विक्रमी धन्वी मेधावी विक्रमः क्रमः॥”
महादेवः। यथा, तत्रैव। १३। १७। ४२।
“कमण्डलुधरो धन्वी बाणहस्तः कपालवान्॥”
तामसमनोः पुत्त्रविशेषः। यथा, हरिवंशे।
७। २४।
“तपोरतिरकल्माषस्तन्वी धन्वी परन्तपः।
तामसस्य मनोरेते दश पुत्त्रा महाबलाः॥”)

धम, ध्माने। ध्माने। इति कविकल्पद्रुमः। (भ्वा-
परं-अकं-सेट्।) धमति। सौत्रधातुरयम्।
इति दुर्गादासः॥

धमः, त्रि, (धमतीति। धम+अच्।) अग्नि-
संयोगकर्त्ता। शब्दकर्त्ता। इति धमधातोः
पचादित्वादच्प्रत्ययेन साध्यः॥

धमकः, पुं, (धमतीति। ध्मा शब्दाग्निसंयोगयोः+
“ध्मो धम च।” उणां २। ३५। इति क्वुन्
धमादेशश्च।) कर्म्मकारः। इत्युणादिकोषः॥

धमनः, पुं, (धम्यतेऽग्निरनेनेति। धम+करणे
ल्युट्।) नलः। इत्यमरः। २। ४। १६२॥
(अस्य पर्य्यायो यथा,—
“नलः पोटगलः शून्यमध्यश्च धमनस्तथा॥”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥
धमतीति। धम+ल्युः।) भस्त्राध्मापके क्रूरे
च त्रि। इति मेदिनी। ने, ७८॥

धमनिः, स्त्री, (धम्यते इति। धम+“अर्त्ति-
सृधृधमीति।” उणां २।१०३। इति अनिः।)
धमनी। इति शब्दरत्नावली॥ (यथा, अथर्व्व-
वेदे। ६। ९०। २।
“यास्ते शतं धमनयोऽङ्गान्यनु विष्ठिताः॥”
प्रह्लादभ्रातुर्ह्लादस्य पत्नी। सा तु वातापे-
रिल्वलस्य च जननी। यथा, भागवते। ६।
१८। १५।
“ह्रादस्य धमनिर्भार्य्यासूत वातापिरिल्वलम्॥”
धमतिर्गतिकर्म्मा। गत्यर्था बुद्ध्यर्थाः। गम्यते
ज्ञायतेऽर्थोऽनया। ज्ञायते वा विद्वद्भिः साध्व-
साधुविभागेन। यद्वा, ‘धमति’ इति वधकर्म्म-
स्वपि पठ्यते धमति हन्त्यनया शापाक्रोशादि-
रूपयेति। वाक्। शब्दः। इति निघण्टुः।
१। ११॥ यथा, ऋग्वेदे। २। ११। ८।
“दूरे पारे वाणीं वर्द्धयन्त
इन्द्रेषितां धमनिं पप्रथन्नि॥”)

धमनी, स्त्री, (धमनि+वा ङीष्।) नाड़ी।
(यथा, महाभारते। १२। २१४। १७।
“दश विद्यात् धमन्योऽत्र पञ्चेन्द्रियगुणावहाः।
याभिः सूक्ष्माः प्रतायन्ते धमन्योऽन्याः सह-
स्रशः॥”
यथा,—
“ओजोवहाः शरीरे वा विधम्यन्ते समन्ततः।
येनौजसा वर्त्तयन्ति प्रीणिताः सर्व्वदेहिनः॥
यदृते सर्व्वभूतानां जीवितं नावतिष्ठते।
यत्सारमादौ गर्भस्य योऽसौ गर्भरसाद्रसः॥
संवर्त्तमानं हृदयं समाविशति यत् पुरा।
यस्य नाशात्तु नाशोऽस्ति धारि यद्धृदयाश्रितम्॥
यच्छरीररसं देहः प्राणा यत्र प्रतिष्ठिताः।
तत्फला विविधा वाताः फलन्तीति महाफलाः॥
ध्मानाद्धमन्यः स्रवणात् स्रोतांसि सरणात्
सिराः॥”
इति चरके सूत्रस्थाने त्रिंशेऽध्याये॥
“चतुर्व्विंशतिर्धमन्यो नाभिप्रभवा अभिहिताः।
तत्र केचिदाहुः सिरा धमनी स्रोतसामविभागः
सिराविकारा एव धमन्यः स्रोतांसि चेति।
तत्तु न सम्यक्। अन्या एव हि धमन्यः स्रोतांसि
च सिराभ्यः कस्माद्व्यञ्जनान्यत्वान्मूलसन्नियमात्
कर्म्मवैशेष्यादागमाच्च केवलन्तु परस्परसन्नि-
कर्षात् सदृशागमकर्म्मत्वात् सौक्ष्म्याच्च विभक्त-
कर्म्मणामप्यविभाग इव कर्म्मसु भवति॥
तासान्तु नाभिप्रभवाणां धमनीनामूर्द्ध्वगा दश-
दश चाधोगामिन्यश्चतस्रस्तिर्य्यग्गाः। ऊर्द्ध्वगाः
शब्दस्पर्शरूपरसगन्धप्रश्वासोच्छ्वासजृम्भितक्षुद्ध-
सितकथितरुदितादीन् विशेषानभिवहन्त्यः शरीरं
धारयन्ति। तास्तु हृदयमभिप्रपन्नास्त्रिधा